विन्ध्येश्वरीस्तोत्रम्

{॥ विन्ध्येश्वरीस्तोत्रम् ॥}

श्रीगणेशाय नमः ।

निशुम्भशुम्भमर्दिनीं प्रचण्डमुण्डखण्डनीम् ।

वने रणे प्रकाशिनीं भजामि विन्ध्यवासिनीम् ॥ १॥

त्रिशूलमुण्डधारिणीं धराविघातहारिणीम् ।

गृहे गृहे निवासिनीं भजामि विन्ध्यवासिनीम् ॥ २॥

दरिद्रदुःखहारिणीं सतां विभूतिकारिणीम् ।

वियोगशोकहारिणीं भजामि विन्ध्यवासिनीम् ॥ ३॥

लसत्सुलोललोचनां लतासदेवरप्रदाम् ।

कपालशूलधारिणीं भजामि विन्ध्यवासिनीम् ॥ ४॥

करो मुदा गदाधरो शिवां शिवप्रदायिनीम् ।

वरावराननां शुभां भजामि विन्ध्यवासिनीम् ॥ ५॥

ऋषीन्द्रजामिनिप्रदां त्रिधास्यरूपधारिणीम् ।

जले स्थले निवासिनीं भजामि विन्ध्यवासिनीम् ॥ ६॥

विशिष्टसृष्टिकारिणीं विशालरूपधारिणीम् ।

महोदरे विशालिनीं भजामि विन्ध्यवासिनीम् ॥ ७॥

पुरन्दरादिसेवितां मुरादिवंशखण्डनीम् ।

विशुद्धबुद्धिकारिणीं भजामि विन्ध्यवासिनीम् ॥ ८॥

॥ इति विन्ध्येश्वरीस्तोत्रं सम्पूर्णम् ॥

Proofread by : Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Vindhyeshwari Stotram Lyrics in Devanagari PDF
% File name : vindhyeshvarIstotra.itx
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Latest update : June 15, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website